एककम्- १

# तालं मेलम्।

कलाः आनन्ददायकाः भवन्ति। तेषु वाद्यकला वैशिष्ट्या एव। वाद्योपकरणानां तालं मेलं च सर्वे इच्छन्ति। 'तालं मेलम्' इत्यस्मिन् एकके तालबोधम् अवगन्तुम् घोषयात्रा नामिका बालकविता दत्तमस्ति। उत्सवेषु तथा आघोषेषु च उपयुज्यमानानां वाद्योपकरणानां परिचायनमपि अस्मिन् पाठे भवति।

विद्यालये दिनाचरणानां समयेऽपि घोषयात्राः भवन्ति। संस्कृतदिने प्रवृत्तमानस्य घोषयात्रा-याः सज्जतां प्रतिपादयितुं एकं संभाषणम् बालोत्सवः नाम द्वितीयः पाठे भवति। तत्र पदकं धृतवतां छात्राणां चित्रम् दत्तमस्ति। तेन चित्रेण संस्कृतदिने पदकधारणस्य आवश्यकतां द्योतयति। तत्र पद-कनिर्माणप्रवर्तनमपि दत्तमस्ति। तद् उत्साहेन कक्ष्यायां करोति चेत् छात्राः अपि स्वयमेव पदकनिर्मा-णं कुर्वन्ति। श्रावणपूर्णिमा संस्कृतदिनम् इति कथनावसरे श्रावणपूर्णिमायाः प्राधान्यम् अधिकृत्य छात्रान् बोधयितुं शक्यते।

तथा एस्.सि.इ.आर्.टि. संस्थायाः ‘संस्कृतमाधुरी’ पुस्तकानि ‘मधुवाणी’ आप्लिकेषन् च उपयुज्य कक्ष्याचालनं सृष्टु करणीयम्। अस्मिन् पुस्तके क्रीडाः अधिकप्रवर्तनानि च दत्तानि सन्ति। तानि अपि कक्ष्यायां यथायोग्यम् अवतारयतु। तेन छात्राणाम् उत्साहवर्धनम् स्यात्।

SCERT KERALA DRAFT

पाठः- १

# घोषयात्रा।

| | |
|---|---|
| **आशयः** | कला। |
| **उपाशयः** | वाद्योपकरणानि। |
| **व्यवहाररूपम्** | बालकविता। |
| **उद्देश्यानि/लक्ष्याणि** | जीवने कलायाः स्वाधीनम् अवगच्छति। केरलेषु सामान्यतः प्रयुक्तानां वाद्योपकरणानां वैविध्यं परिचिनोति। |
| **मूल्यम्/मनोभावः** | वाद्योपकरणेषु तथा कलासु च तात्पर्यं वर्धयति।<br>सर्वत्र कलाकाराः आदरणीयाः इति बोधयति।<br>तालप्रयोगे तात्पर्यं वर्धयति। |
| **पठनलक्ष्याणि** | बालकवितां सतालम् आलपति।<br>कवितायाः आशयं वदति लिखति च।<br>नूतनपदानि वदति।<br>क्रियापदानि वदति लिखति च।<br>लघुवाक्यानि वदति लिखति च। |
| **पठनक्षमता** | अक्षरं लिखति।<br>तालास्वादनम्। |
| **कालांशः** | १३ |

SCERT KERALA DRAFT

**पाठस्य आमुखम्**

अस्यां बालकवितायां एकां घोषयात्रां चित्रीकरोति। तथा विविधानां वाद्योप करणानां तेषां शब्दानां च परिचायनं करोति। तालपरिचायनेन सह जीवनं सर्वत्र तालमयम् इति प्रत्यभिजानाति। कलाः आस्वादनीयाः। कलाद्वारा मानसिकोल्लासं भविष्यति इति समर्थयति।

**प्रवेशकप्रवर्तनम्**

प्रथमं सचित्रं दीपोः मीनोः च परिचायनं करोति। तयोः संभाषणम् अपि कक्ष्यायां पठति। अनन्तरं डिण्डिमशब्दं श्रावयति।
अधोदत्तान् प्रश्नान् पृच्छति।

१. अयं शब्दः कस्य वाद्योपकरणस्य?

२. एतत् वाद्योपकरणं पश्यति किम् ?

३. युष्माकं देशे अतीतघोषयात्रायाम् एतत् दृष्टवन्तः किम्?

घोषयात्रायाः चित्रं अध्यापिका प्रदर्शयति। चित्रे किम् किम् अस्ति इति पृच्छति। वाद्योपकरणानां शब्दं कथमिति छात्रान् पृष्ट्वा कवितां सतालम् आलपति।

**पाठापग्रथनम्**

घोषयात्रायाः वर्णनेन सह विविधवाद्योपकरणानां नामानि तथा तालानि च अवगच्छन्ति। तद्वारा छात्राः जीवनतालं अवगच्छन्ति।

कवितेयं तालबोधं प्रकटयति। प्रकृतेरपि तालमस्ति। प्रकृतेः तालं नद्यां, सागरे, कानने च सर्वत्र श्रोतुं शक्यते। अस्माकं शरीरे हृदयस्य तथा श्वासोच्छ्वासस्य तालमस्ति। हृदयतालं, श्वासतालं च जीवनतालं भवति। तत् जीवनतालं सम्यक् जानातु इत्येव अस्य कवितायाः विशिष्टाशयः।

**चित्राणाम् विशदीकरणम्।**

पाठपुस्तकस्य दशमपुटे कस्यचन घोषयात्रायाः चित्रं दृष्टुं शक्नुमः। चित्रे वाद्यकलाकाराः वाद्यानि वाचयन्ति छात्राः नृत्यन्ति च।

SCERT KERALA DRAFT

## पठनप्रवर्तनानि।

**प्रवर्तनम्- 1 (कवितालापनम्।)**

**पठनलक्ष्याणि - बालकवितां सतालम् आलपति।**

अध्यापकः ऐ.सि.टि द्वारा बालकवितां श्रावयति। अनन्तरं आदर्शवाचनं करोति। छात्राः एकैकशः तथा संघशः च कविताम् आलपन्ति।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। तालबोधः। अक्षरस्फुटता।

**प्रवर्तनम्- 2 (आशयकथनम्।)**

**पठनलक्ष्याणि - कवितायाः आशयं वदति।**

अध्यापिका ऐ.सि.टि द्वारा घोषयात्रायाः वीडियो प्रदर्श्य वाद्योपकरणानां शब्दान् श्रावयति। अनन्तरं कवितायाः आशयं किमिति छात्रान् पृच्छति। छात्राः मातृभाषायां कवितायाः आशयं वदति।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरस्फुटता। आशयग्रहणम्।

**प्रवर्तनम्- 3 (चित्रं दृष्ट्वा तालकथनम्।)**

**पठनलक्ष्याणि - कवितायाः आशयं वदति।**

पाठपुस्तकस्थं चित्रं प्रदर्श्य (पुट संख्या- 12) अध्यापिका एकैकं तालम् उच्चैः वदति वाचयति च। तेन प्रकृत्यां सर्वं तालमयमिति बोधं जनयति। (प्रकृतिः तालमयी। तत् तालानुसृत्यैव जीवनं सुन्दरं भवति। मनःशान्तिः च प्रकृतिनीरीक्षणेन प्राप्नोति। निरीक्षणकौशलं वर्धते।)

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरस्फुटता। निरीक्षणकुशलता।

**प्रवर्तनम्- 4 (उच्चैः वाचनम्।)**

**पठनलक्ष्याणि - नूतनपदानि वदति।**

विविधानां वाद्योपकरणानां नामानि चित्रैः सह छात्राः अवगच्छन्ति। उच्चैः वाचयन्ति। (लोके विविधानि वाद्योपकरणानि सन्ति। तेषां नामपरिचायनं तात्पर्यवर्धनम् च।)

SCERT KERALA DRAFT

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरस्फुटता। वाचनकौशलम् ।

**प्रवर्तनम्- 5 (यथोचितयोजनम्।)**

**पठनलक्ष्याणि - तालावबोधः।**

वाद्योपकरणानां शब्दान् ICT साहाय्येन छात्राणां कृते श्रावयित्वा एकैकानां वाद्योपकरणानां शब्दान् अवगम्य छात्राः यथोचितं योजयन्ति। (**एवं वाद्योपकरणानां वादनम् एका कला भवति इति अवगम्य** तेन जीवनोपाधिम् प्राप्तुं शक्यते इति बोधं जनयति।)

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरज्ञानम्। निरीक्षणकौशलम्।

**प्रवर्तनम्- 6 (क्रियापदकथनम्।)**

**पठनलक्ष्याणि - क्रियापदानि वदति।**

चित्रसाहाय्येन क्रियापदानां लट् बहुवचनरूपाणि परिचिनोति वदति च।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरस्फुटता। वाचनकौशलम् ।

**प्रवर्तनम्- 7 (वाक्यलेखनम्।)**

**पठनलक्ष्याणि -वाक्यं लिखति।**

बिन्दून् योजयित्वा नामपदं तथा क्रियापदं च संयोज्य वाक्यनिर्माणाय छात्रान् प्रेरयति। लेखनाय च प्रेरणां करोति।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरज्ञानम्। लेखनसामर्थ्यम् ।

**प्रवर्तनम्- 8 (अक्षरलेखनम्।)**

**पठनलक्ष्याणि - अक्षरं लिखति।**

बिन्दून् योजयित्वा 'ड' इति अक्षरं छात्राः लिखन्ति। तेन अक्षरलेखनसामर्थ्यं वर्धयन्ति। लेखनाय मधुवाणी च उपयोक्तव्या।

**मूल्यनिर्णयसूचकानि -** अक्षरज्ञानम्। लेखनसामर्थ्यम्। क्रमबद्धता।

SCERT KERALA DRAFT

**प्रवर्तनम्- 9 (चित्रपुस्तकनिर्माणम्।)**

**पठनलक्ष्याणि - चित्रपुस्तकनिर्माणम्।**

वाद्योपकरणानां चित्राणि सञ्चित्य एकस्मिन् पुस्तके योजयित्वा तस्य अधः नामानि च विलिख्य चित्रपुस्तकं निर्मातुं छात्रान् प्रेरयति। चित्रपुस्तकमिदं संरक्षणीयम्।

**मूल्यनिर्णयसूचकानि -** निरीक्षणकौशलम् । लेखनसामर्थ्यम् ।

**प्रवर्तनम्- 10 (वर्णलेपनम्।)**

**पठनलक्ष्याणि - वर्णज्ञानम्।**

चित्रम् उचितवर्णैः लेपयितुं छात्रान् प्रेरयति।

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्। वर्णविन्यासः। वर्णसंकलनम् ।

**प्रवर्तनम्- 11 (वाद्योपकरणानां शब्दानुकरणम्।)**

**पठनलक्ष्याणि -शब्दानुकरणम्।**

वीडियो प्रदर्श्य अध्यापिका एकैकस्य वाद्योपकरणस्य शब्दं श्रावयति। अनन्तरं सा वाद्योपकरणशब्दस्य अनुकरणं कर्तुं छात्रानपि प्रेरयति।

**मूल्यनिर्णयसूचकानि -** अनुकरणसामर्थ्यम्, शब्दविवेचनम्

**अग्रिमपाठसंयोजकं प्रवर्तनम्**

अध्यापिका पाठपुस्तकस्थं वर्णलेपनस्य चित्रं प्रदर्श्य तत्रस्थाः छात्राः कुत्र गच्छन्ति इति पृच्छति। "छात्राः विद्यालयं गच्छन्ति" इति छात्राः उत्तरयन्ति। तद्वारा अध्यापिका विद्यालयं पश्यामः इति उक्त्वा द्वितीयपाठं प्रति छात्रान् नयति।

**अनुबन्धः**

सुप्रसिद्धवाद्यकलाकाराणां नामानि तेषां चित्राणि च सञ्चित्य कक्ष्यायां प्रदर्शयतु। वाद्यकलाकारस्य साक्षात्कार (Interview) वीडियो प्रदर्शयतु। केरलकलामण्डलस्य वा अवतरणम्। तत्र विद्यमानानां वाद्यकलाकारणां परिचायनं च करणीयम्।

SCERT KERALA DRAFT

## ഡിംഡിമകാംസ്യമർദ്ദള - ക്രീഡാ

കുട്ടികളെ വട്ടത്തിൽ നിർത്തുക. ഒരു കുട്ടി വട്ടത്തിനകത്ത് കുട്ടികളുടെ അടുത്തുകൂടെ ഒരു കുട്ടി ഡിംഡിമകാംസ്യമർദ്ദള - എന്ന് പറഞ്ഞ് അകത്ത് ചുറ്റുന്നു. ചുറ്റുന്ന കുട്ടി തനിക്ക് ഇഷ്ടമുള്ള കുട്ടിയുടെ അടുത്ത് ചെന്ന് ഡിംഡിമഃ എന്ന് ഉറക്കെ പറഞ്ഞാൽ ആ കുട്ടി ഡിംഡിംഡിം എന്ന് ആംഗ്യസഹിതം കൊട്ടി ക്കൊട്ടി ശബ്ദമുണ്ടാക്കണം. ഇതുപോലെ കാംസ്യ താലഃ , മർദ്ദളഃ ഇവയും മാറി മാറി പറയുകയും കാണിക്കുകയും ചെയ്യാം. തെറ്റിക്കാണിക്കുന്നവർ നടുവിലേക്കിറങ്ങുകയും അയാളുടെ സ്ഥാനത്തേക്ക് നടക്കുണ്ടായിരുന്നയാൾ കയറി നിൽക്കുകയും ചെയ്യുക. കളി വീണ്ടും ആരംഭിക്കുക.

## क्रियापदानि

| | | | | | |
|---|---|---|---|---|---|
| वदन्ति | आलपन्ति | सिञ्चन्ति | उत्तिष्ठन्ति | स्थापयन्ति | मीवन्ति |
| स्फुरन्ति | रचयन्ति | पतन्ति | क्षिपन्ति | लेपयन्ति | पृच्छन्ति |
| स्पृशन्ति | फलन्ति | धावन्ति | उद्घाटयन्ति | कुर्वन्ति | तिष्ठन्ति |
| चलन्ति | पठन्ति | लिखन्ति | स्वीकुर्वन्ति | प्रक्षालयन्ति | हसन्ति |
| पिबन्ति | पश्यन्ति | गच्छन्ति | पचन्ति | गायन्ति | कूजन्ति |
| खादन्ति | गायन्ति | उपविशन्ति | भजन्ति | अवलोकयन्ति | रुदन्ति |

✡ ✡ ✡ ✡ ✡

SCERT KERALA DRAFT

पाठः- २

# बालोत्सवः।

| | |
|---|---|
| **आशयः** | कला। |
| **उपाशयः** | उत्सवः। |
| **व्यवहाररूपम्** | संभाषणम्। |
| **उद्देश्यानि/लक्ष्याणि** | संस्कृतदिनाचरणे तात्पर्यं वर्धयति।<br>दिनाचरणानां प्राधान्यम् अवगच्छन्ति।<br>पदकनिर्माणं परिचिनोति। |
| **मूल्यम् / मनोभावः** | संस्कृतभाषां प्रति तात्पर्यं वर्धयति।<br>संस्कृतभाषाप्रचारणस्य आवश्यकताम् अवगच्छति। |
| **पठनलक्ष्याणि** | संभाषणं करोति।<br>आचारोपचारशब्दान् वदति।<br>उत्सवानां नामानि वदति।<br>लोट् लकारस्य प्रयोगम् अवगच्छति।<br>अक्षरं लिखति।<br>वाक्यनिर्माणं परिचिनोति। |

SCERT KERALA DRAFT

**पठनक्षमता** भाषणसामर्थ्यम्।

**कालांशः** १२

**पाठस्य आमुखम्** अनेन संभाषणेन छात्रेषु संस्कृतभाषाप्रयोगे तात्पर्यं वर्धते। संस्कृतप्रचारणार्थं किं किं करणीयम् इति अवगच्छन्ति। संस्कृतदिनं कथम् आघुष्यते इति छात्राः अवगच्छन्ति।

**प्रवेशकप्रवर्तनम्** अध्यापिका संभाषणेन साकं श्रावणपूर्णिमायाः प्राधान्यं कक्ष्यायां वदति। संस्कृतदिनं कथं विद्यालये आघुष्यते इति पृष्ट्वा 'बालोत्सवः' इति पाठं प्रविशति। चित्रं प्रदर्श्य कक्ष्यायां पाठभागस्थं संभाषणं साभिनयम् अवतारयति।

**पाठापग्रथनम्**

बालाः सर्वे उत्साहपूर्वं कार्याणि कर्तुम् इच्छन्ति। तेषाम् उत्साहवर्धनार्थं तथा सहकरणमूल्यानां वर्धनाय च विद्यालयेषु विविधानि दिनाचरणानि आघोषयन्ति। पठनम् उत्साहेन भवति चेत् तत् सर्वदा मनसि स्थास्यति। तदर्थं सहायकं भवति दिनाचरणानि तथा उत्सवाः च। अस्मिन् पाठे संभाषणेन सह संस्कृतदिनाघोषः कथमिति जानाति। मुद्रावाक्यानि च अवगच्छति। संभाषणवेलायां आचारोपचारशब्दानां प्रयोगः कुत्र कुत्र करोति इति प्रकटयति। तेन छात्राणां मनसि संभाषणस्य संस्कृतिः जायते।

अत्र संस्कृतदिनाचरणस्य स्वरूपं प्रकटयति। येन संस्कृतदिनाचरणं किम् इतिछात्राः अवगच्छन्ति । छात्राः तस्मिन् दिने स्वयमेव पदकनिर्माणं कृत्वा आगच्छति। तथा स्फोरकपत्राणि सज्जीकुर्वन्ति च। अनेन तेषां मनसि भाषायाः स्वाधीनं वर्धते। घोषयात्रायां ते उत्साहेन संस्कृतपदानि वदन्ति। एवं अग्रिमवर्षे संस्कृतदिनाचरणाय ते एव अग्रेसराः भविष्यन्ति। अनेन सह अध्यापिका संस्कृतदिनस्य तथा संस्कृतस्य च प्राधान्यं बोधयति चेत् ते बालाः संस्कृतपठने तत्पराः भवेयुः।

**चित्राणाम् विशदीकरणम्**

छात्राणां चित्रम्। -संस्कृतदिने छात्राः सर्वे पदकं धारयन्ति इति बोधयति।

कक्ष्यायाः चित्रम्। -संस्कृतदिने श्यामफलके दिनस्य प्राधान्यं लेखनीयम्। तथा कक्ष्या च अलङ्करणीयेति बोधयति।

घोषयात्रायाः चित्रम् -श्रावणपूर्णिमा संस्कृतदिनं भवति इति बोधयित्वा विद्यालये घोषयात्रा सञ्चालनीया इति अवगच्छति।

SCERT KERALA DRAFT

## पठनप्रवर्तनानि

**प्रवर्तनम्- 1 (स्फोरकपत्राणां पठनम्।)**

**पठनलक्ष्याणि - मुद्रागीतपठनम्।**

वदतु संस्कृतम्, पठतु संस्कृतम् इत्यादि स्फोरकपत्राणि अध्यापिका प्रदर्शयति पाठयति च ।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरज्ञानम्। लेखनसामर्थ्यम्।

**प्रवर्तनम्- 2 (स्फोरकपत्राणां पूरणम्।)**

**पठनलक्ष्याणि - वाक्यलेखन सामर्थ्यवर्धनम्।**

बिन्दून् योजयित्वा स्फोरकपत्राणां पूरणाय अध्यापिका छात्रान् पाठयति। स्फोरकपत्रनिर्माणाय च छात्रान् प्रेरयति।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरज्ञानम्। लेखनसामर्थ्यम्।

**प्रवर्तनम्- 3 (पदकनिर्माणम्।)**

**पठनलक्ष्याणि - पदकनिर्माणं परिचिनोति।**

पदकनिर्माणस्य वीडियो प्रदर्श्य पदकनिर्माणाय छात्रान् प्रेरयति। कक्ष्यायाम् अध्यापिका छात्राणां पुरतः स्थित्वा स्वयमेव पदकं निर्माति।

**मूल्यनिर्णयसूचकानि -** निर्माणकौशलम् । अर्थावबोधः। अक्षरज्ञानम्। लेखनसामर्थ्यम् ।

**प्रवर्तनम्- 4 (आशंसावाक्यकथनम्।)**

**पठनलक्ष्याणि - आचारोपचारशब्दान् वदति।**

चित्रं तथा PPT च प्रदर्श्य आचारोपचारशब्दान् बोधयति। छात्राः कक्ष्यायां प्रत्येकं प्रत्येकम् सन्दर्भानुसारं वाक्यानि कथयन्ति ।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरस्फुटता। वाचनकौशलम्।

SCERT KERALA DRAFT

**प्रवर्तनम्- 5 (वाक्यपूरणम्।)**

**पठनलक्ष्याणि - वाक्यनिर्माणं परिचिनोति।**

पुस्तकस्थोदाहरणद्वारा 'कदा' इति प्रश्नवाचकस्य उपस्थापनं कृत्वा सोदहारणं वाक्यपूरणाय छात्रान् प्रेरयन्ति।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरज्ञानम्। लेखनसामर्थ्यम् ।

**प्रवर्तनम्- 6 (अक्षरलेखनम्।)**

**पठनलक्ष्याणि - अक्षरं लिखति।**

बिन्दून् योजयित्वा 'स' इति अक्षरं छात्राः लिखन्ति। तेन अक्षरलेखनसामर्थ्यं वर्धते।
**मूल्यनिर्णयसूचकानि -** अक्षरज्ञानम्। लेखनसामर्थ्यम्। क्रमबद्धता।

**प्रवर्तनम्- 7 (यथोचित योजनम्।)**

**पठनलक्ष्याणि - उत्सवानां नामानि वदति।**

अस्माकं देशे उत्सवानाम् अतीव प्राधान्यम् अस्ति इति उक्त्वा भारतस्य प्राधानदेशीयोत्सवानां नामानि PPT द्वारा प्रदर्शयति। तेषां प्राधान्यमपि विशदीकरोति। अनन्तरं पुस्तकस्थानि चित्राणि प्रदर्श्य उत्सवानां नामानि कथयितुं छात्रान् प्रेरयति। तेन पाठपुस्तकस्थचित्रैः सह उत्सवनामानां यथोचितयोजनं च कारयति।

**मूल्यनिर्णयसूचकानि -** अर्थावबोधः। अक्षरज्ञानम्।निरीक्षणकौशलम् ।

**प्रवर्तनम्- 8 (प्रादेशिकोत्सवनामानां समाहरणम्।)**

**पठनलक्ष्याणि - उत्सवानां नामानि लिखति।**

अस्माकं प्रदेशे के के उत्सवाः सन्ति इति पृष्ट्वा प्रादेशिकोत्सवानां नामानि वदन्ति।
**मूल्यनिर्णयसूचकानि -** आशयग्रहणम्। निरीक्षणकौशलम्। लेखनसामर्थ्यम्।

**प्रवर्तनम्- 9 (चित्रपुस्तकनिर्माणम्)**

**पठनलक्ष्याणि - चित्रपुस्तकनिर्माणम्।**

SCERT KERALA DRAFT

उत्सवानां चित्राणि सञ्चित्य सचित्रपुस्तके योजयित्वा तस्य अधः नामानि च विलिख्य सम्पुटनिर्माणार्थं छात्रान् प्रेरयति।

**मूल्यनिर्णयसूचकानि -** आशयग्रहणम् । निरीक्षणकौशलम् । लेखनसामर्थ्यम् ।

**अग्रिमपाठसंयोजकं प्रवर्तनम् ।**

प्रादेशिकोत्सवानां विवरणसमये जलोत्सवः इति पदं स्वीकृत्य जलोत्सवः किम् इति पृच्छति। तेन नौकाकेलीं ज्ञापयति। तर्हि नौका कुत्र वर्तते इति पृच्छति। नौका जलाशये भवति इति ज्ञापयति। जलयात्रायै नौका उपयुज्यते। स्थले किम्? गगने किम्? इति पृष्ट्वा "यात्रा" नाम एककं प्रविशति।

**अनुबन्धः**

**संस्कृतदिनस्य विवरणम्।**

भारते संस्कृतानुरागिणां मुख्यदिवसो भवति श्रावणमासे पूर्णिमा तिथिः। पञ्चदशकं यावत् दिनमिदं संस्कृतदिवसत्वेन आचर्यते। 1969 तमे वर्षे एं. सी. चग्ला वर्यः यदा केन्द्रीय शिक्षामन्त्री आसीत् तदा एव संस्कृतदिनमायोजयितुं निर्णयो जातः। तदा प्रभृत्येव आकाशवाण्यां संस्कृतवार्ता-प्रसारणमपि समारब्धम्। अटल् बिहारी वाजपेयी वर्यः प्रधानमन्त्रीपदव्यां स्थित्वा 2000-2001 वर्षः संस्कृतवर्षत्वेन आचरितः। तदा प्रभृति प्रतिवर्षं संस्कृतवाराचरणमेव इदानीं संपत्स्यते। संस्कृतदिन-स्य पूर्वं दिनत्रयं पश्चाच्च दिनत्रयं समायोज्य संस्कृतवारम् आचर्यते।

"संस्कृतं राष्ट्रैक्याय" इति मुद्रावाक्यम् उद्घोषयन्नेव संस्कृतदिनमाचर्यते। अस्याः अमृतभा-षायाः प्राधान्यं प्रसक्तिं च सामान्यजनेभ्यो अवबोधयितुं तथा संस्कृतपठनद्वारा पौराणिकम् आधुनिकं च विज्ञानं संयोजयितुमेव एतादृशं दिनाचरणम् कल्पितमस्ति। व्यवहारभाषात्वेन संस्कृतं प्रतिष्ठितुं यत्नं कृतवन्तः बहवः विद्वांसः सन्ति। संस्कृतभाषा तथा तस्यामन्तर्लीनां संस्कृतिं विपुलां संपदं च मानवजीवनस्य विभिन्नां मेखलां स्पृशन्ति। वेदेषु वेदाङ्गेषु इतिहासपुराणादिषु दर्शनेषु उपनिषत्सु च सूचितानां विज्ञानानां प्रचारणम् आधुनिककाले अवश्यंभावि। अतः संस्कृतदिनाचरणं केवलं आचर-णाय न भवतु, संस्कृतप्रचारायैव भवतु।

**संस्कृतदिनप्रतिज्ञा।**

संस्कृतं मम जीववाणी। तस्याः समृद्धायां नानाविधायां पूर्विकसम्पत्तौ अभिमानी भवामि। संस्कृतपठनं मम विनय-आत्मगौरव-सदाचार-सामूह्यबोधादीनां सद्गुणानां विकासाय प्रभावयति। वसुधैवकुटुम्बकं, सत्यमेव जयते, सर्वे भवन्तु सुखिनः, इत्यादिभिः आप्तवचनैः राष्ट्रस्य अखण्डताम् ऐक्यं च संस्कृतभाषायां सुरक्षितमिति विवेचयामि। अहं जाति-वर्ग-स्त्री-पुरुषभेदबुद्धिं विना संस्कृत-भाषापठने तथा प्रचारणे च सदा सर्वथा प्रयत्नं करोमि। स्नेहमयी माता स्वपुत्रानिव अन्यभाषा अपि आदरिष्ये। जयतु संस्कृतम्। जयतु भारतम्।

SCERT KERALA DRAFT

# पाठानुबन्धक्रीडा

**സന്ദേശപ്രേക്ഷണം**

കുട്ടികൾ രണ്ടുസംഘങ്ങളായി തിരിഞ്ഞ് വരിയായോ വൃത്തത്തിലോ ഇരിക്കുന്നു. ഒരു ഗ്രൂപ്പിലെ കുട്ടിയെ വിളിച്ച് അധ്യാപകൻ ചെറിയൊരു സംസ്കൃതവാക്യം ചെവിയിൽ പറഞ്ഞു കൊടുക്കുന്നു. രണ്ടാമത്തെ ടീമിലെ കുട്ടികൾ ഒന്നാമത്തെ ടീമിലെ ഈ കുട്ടിയുടെയും മറ്റു കുട്ടികളുടെയും ഇടയിൽ നിൽക്കുന്നു. എന്നിട്ട് അവിടെനിന്ന് ഉറക്കെ 'പഠതു സംസ്കൃതം വദതു സംസ്കൃതം ലിഖതു സംസ്കൃതം' എന്ന് ഉച്ചത്തിൽ പറഞ്ഞ് ബഹളം ഉണ്ടാക്കുന്നു.

ഈ അവസരത്തിൽ അധ്യാപകൻ പറഞ്ഞുകൊടുത്ത സംസ്കൃതവാക്യം ഉറക്കെപറയുന്നു. അപ്പുറത്ത് നിൽക്കുന്ന കുട്ടിയുടെ ഗ്രൂപ്പിലെ കുട്ടികൾ അത് മനസിലാക്കിപ്പറയുന്നു. ശരിയുത്തരം പറഞ്ഞാൽ ഒരു പോയിന്റ്. ഒരു ഗ്രൂപ്പിന് ശരിയുത്തരം പറയാൻ മൂന്ന് അവസരം നൽകാവുന്നതാണ്. അതിനുശേഷം അടുത്ത ഗ്രൂപ്പ് എന്ന രീതിയിൽ കളി പുനരാരംഭിക്കുന്നു.

**आदर्शवाक्यानि।**

मम अनुजस्य नाम रोहित्।

मम अध्यापकस्य नाम ..... भवति।

संस्कृतं मम इष्टभाषा।

मम विद्यालयः सुन्दरः भवति।

अहं संस्कृतं पठामि।

संस्कृतेन भाषणं कुरु।

✡ ✡ ✡ ✡ ✡

SCERT KERALA DRAFT